Shodhshauryam, International Scientific Refereed Research Journal
© 2022 SHISRRJ | Volume 5 | Issue 3 | ISSN : 2581- 6306

# श्रीलिङ्गराजभक्तिसाहित्येऽलङ्काराः

सुषमा साहुः,
अनुसन्धात्री, साहित्यविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः, आन्ध्रप्रदेशः।

**Article Info**
Volume 5, Issue 3
Page Number : 69-83

**Publication Issue :**
May-June-2022

**Article History**
Accepted : 01 May 2022
Published : 30 May 2022

शोधसारः – श्रीलिङ्गराजभक्तिसाहित्यमित्युक्ते अत्र स्वर्णाद्रिमहोदयः, एकाम्रचन्द्रिका, क्षेत्रद्वये विप्रविलसितम्, श्रीलिङ्गराजायनम् इति चतुर्णां ग्रन्थानामत्र अलङ्कारपर्यालोचनं यथामति क्रियते । एतेषु काव्येषु अनुप्रासः, यमकम्, उपमा, रूपकम्, अर्थापत्तिः, स्वभावोक्तिः, उदात्तः, व्यतिरेकः, अधिकम्, दीपकम्, काव्यलिङ्गम्, सन्देहः, अपह्नुतिः, उल्लेखः, अतिशयोक्तिः, कारकदीपकम् इत्यादयः नैके अलङ्काराः नूपुरझङ्कारवत् साहित्यस्य सौन्दर्यं वर्धयन्ति । एतेषां लक्षणोदाहरणानि अत्र विमृश्यन्ते ।]

कूटशब्दाः – अनुप्रासः, श्रीलिङ्गराजायनम्, स्वर्णाद्रिमहोदयः, एकाम्रचन्द्रिका, विप्रविलसितम्, वृत्त्यनुप्रासः, उपमा, रूपकम् अर्थापत्तिः, यमकम्, स्वभावोक्तिः, उदात्तः, व्यतिरेकः, अधिकम्, दीपकम्, काव्यलिङ्गम्, सन्देहः, अपह्नुतिः, उल्लेखः, अतिशयोक्तिः, कारकदीपकम् ।

अलङ्कारशास्त्रे भरतात्प्रारभ्य आधुनिकालङ्कारिकाः सर्वेऽपि काव्ये द्वयोः सौन्दर्यतत्त्वयोः चर्चामवश्यं कुर्वन्ति । तत्रैकः रसः, द्वितीयः अलङ्कारः । अलङ्काराः काव्यात्मभूतस्य रसस्य उपकर्षकाः सन्ति । यथा मानवशरीरे कटककुण्डलाद्याभूषणानि भवन्ति, तथैव शब्दार्थशरीरभूतस्य काव्यस्य अनुप्रासोपमादयः अलङ्काराः भवन्ति । अस्य लक्षणं साहित्यदर्पणे इत्थं प्रतिपाद्यते ---

शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः ।
रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवत् ।।[1]

(1) अनुप्रासः – रसाद्यनुकूलतया वर्णानां न्यासः अनुप्रासः । यथोक्तं मम्मटेन –"वर्णसाम्यमनुप्रासः"[2] इति। यत्र अव्यवधानेन वर्णानां समता वर्तते तत्रानुप्रासः । अनुप्रासः वर्णगतशब्दगतत्वेन द्विविधः । वर्णानुप्रासः छेकवृत्तिगतत्वेन द्विविधः । तत्र छेकानुप्रासः –"सोऽनेकस्य सकृत्पूर्वः"[3] । अनेकव्यञ्जनवर्णस्य स्वरूपतः क्रमतश्चैकवारमात्रसाम्यं यत्र भवति तत्र च्छेकानुप्रासः । च्छेकः विदग्धजनः, तत्कृतशब्दालङ्कारः छेकानुप्रासः । "छेको व्यञ्जनस«स्य सकृत्साम्यमनेकधा" इति साहित्यदर्पणे । अनेकधा नाम स्वरूपतः क्रमतश्च ।

वृत्त्यनुप्रासः – "एकस्याप्यसकृत् परः"[4] । यत्र एकस्य अनेकस्य वा व्यञ्जनवर्णस्य वारम्बारं साम्यं भवति तत्र वृत्त्यनुप्रासः । वृत्त्यनुप्रासेऽस्मिन् माधुर्यव्यञ्जकवर्णैः रचिता उपनागरिकावृत्तिः, ओजोव्यञ्जकवर्णैः परुषावृत्तिः,

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

Journal
©

प्रसादव्यञ्जकैर्वर्णै: रचिता कोमला वृत्तिश्चान्तर्गता भवति । साहित्यदर्पणे अन्त्यानुप्रासः, श्रुत्यनुप्रास इति भेदद्वयं स्वीकृतम् । तत्र अन्त्यानुप्रासस्य लक्षणं यथा –

व्यञ्जनं चेद्यथावस्थं सहाद्येन स्वरेण तु ।
आवर्त्यन्तेऽन्त्ययोज्यत्वादन्त्यानुप्रास एव तत् ।।[5]

श्रुत्यनुप्रासलक्षणमपि एवमस्ति –

उच्चार्यत्वाद्यदेकत्र स्थाने तालुरदादिके ।
सादृश्यं व्यञ्जनस्यैव श्रुत्यनुप्रास उच्यते ।।[6]

शब्दगतानुप्रासः लाटानुप्रास इत्युच्यते । तल्लक्षणं यथा –"शाब्दस्तु लाटानुप्रासः भेदे तात्पर्यमात्रतः"[7] इति। भिन्नतात्पर्य्ययुक्ततुल्यार्थकशब्दानां यत्र समता विद्यते तत्र लाटानुप्रासः ।स्वर्णाद्रिमहोदयेऽस्योदाहरणं यथा –

कीर्त्तिर्यस्य सुरासुरैर्मुनिवरैरागीयते नित्यशो
नाकक्ष्मातलवासिभिस्सुरनरैर्विद्याधरैः किन्नरैः ।
पातालेषु च कन्दरेष्वपि महीध्रणां गतैः पन्नगै–
र्ब्रह्मोपेन्द्रसहान्वितैस्त्रिजगतः कत्रे नमश्शम्भवे ।।[8]

अस्मिन् पद्ये सुरासुरैः, मुनिवरैः, सुरनरैः, विद्याधरैः, किन्नरैः इत्यादिषु पदेषु अन्त्याक्षरस्य साम्यात् अन्त्यानुप्रासः । अपि च स–वर्णस्यानेकधा साम्यम्, गतैः पन्नगैः इत्यत्र ग–कारस्य सकृत्साम्यम्, सहान्वितैः त्रिजगतः कत्रे इत्यत्र त–कारस्य बहुधा साम्यादपि अनुप्रासालङ्कारः स्वीक्रियते । तथैव –

ज्ञात्वा शिवासंस्करणं शिवस्तु
विश्वेश्वरो विश्वशिवप्रदाता ।
नन्दीश्वरादि प्रथमांश्च तत्र
सन्त्यज्य गन्तुं स मनो विधत्ते ।।[9]

अस्मिन् श्लोके श–कारस्य तथा श्वेतिसंयुक्ताक्षरस्य बहुधासाम्यात् अनुप्रासालङ्कारः । एवमेव –

वव्रे वरं सममनन्दनकाविमौ भो
नित्यं सुराहि भवतां पुरुषैरवध्यौ ।
शस्त्रैस्तथास्तु वचनं त्रिदशा ब्रुवाणा
गच्छन्ततो मृगसुलोचनि तौ जहि त्वम् ।।[10]

अस्मिन् स्लोके व–कारस्य बहुधासाम्यं वर्तते । यथा – वव्रे, वरम्, नन्दनकाविमौ, भवताम्, अवध्यौ, वचनम् इत्यादिषु पदेषु । अपि च सममनन्दनकाविमौ इत्यत्र म–कारस्य साम्यम्, नकारस्य च साम्यं वर्तते । अतः अनुप्रासस्येदमुदाहरणं भवति । एवं स्वर्णाद्रिमहोदये नैकानि अनुप्रासस्योदाहरणानि वर्तन्ते । केवमुदाहरणत्रितयमेवात्र दर्शितम् । एकाम्रचन्द्रिकायाम् अनुप्रासस्योदाहरणं यथा –

भवानीशङ्करौ वन्दे भवदुःखहरौ परौ ।
पितामहौ च देवानां पितरौ करुणाकरौ ।।[11]

Journal
©

अस्मिन् उदाहरणे शङ्करौ, दुःखहरौ, परौ, पितरौ, करुणाकरौ इत्यादिषु पदेषु रौ-इति अन्त्यवर्णस्य साम्यादत्रान्त्यानुप्रासः स्वीक्रियते । तथैव भवानी, भवदुःख इत्यनयोः शब्दयोः 'भव" इति पदसाम्यादपि अनुप्रासः । पितामह, पितरौ इत्यत्रापि प-तवर्णयोः स्वरूपतः क्रमतश्च साम्यं भवति । अतः छेकानुप्रासो नामलाङ्कारः । अपि च "करुणाकरौ" इति पदे करुणायाः उपरि आकरस्यारोपणात् रूपकालङ्कारोऽपि भवति । एतेषां सर्वेषामपि पृथगाभासात् संसृष्टिर्नामालङ्कारः स्वीकरणीयः । एकाम्रचन्द्रिकायां सहस्राधिकाः श्लोकाः वर्तन्ते । प्रायशः सर्वत्र अनुप्रासस्य स्वरझङ्कारः श्रूयते इति नास्ति सन्देहः । "क्षेत्रद्वये विप्रविलसितम्" इति काव्येऽनुप्रासो यथा –

शान्ते कान्ते विरावे बहुविधघटनाव्यस्तभावानुभावे
चिन्ताचैतन्यजाते क्षणमपचरिते ज्ञानविज्ञानकाये ।
कोणे कोणे च क्षुण्णे प्रसरति बहुले स्निग्धगाढान्धकारे
विप्रस्यागात्प्रथमदिवसः ब्रह्मचर्याश्रमेऽस्मिन् ।।[12]

अत्र अन्त्यानुप्रासः, छेकानुप्रासः, लाटानुप्रासः, वृत्त्यनुप्रासः, श्रुत्यनुप्रासश्चेति सर्वेषामपि अनुप्रासभेदानां दर्शनं भवति । शान्ते कान्ते, विरावे, भावानुभावे, चैतन्यजाते अपचरिते, कोणे कोणे च क्षुण्णे इत्यादिषु अन्त्यानुप्रासोऽस्ति । अपि च चिन्ताचैतन्यजाते इत्यत्र त-कारस्य बहुधासाम्यम्, स्निग्धगाढान्धकारः इत्यत्र ध-कारस्य सकृत्साम्यं च वर्तते। अतः अनुप्रासस्य प्रकृष्टमिदमुदाहरणं स्यात् । यथा च –

कर्पूरवर्त्तिप्रथितावभासा कस्तूरिकाचन्दनर्च्चिता च ।
गन्धाढ्यधूपेन प्रमोदिता त्वं मातः प्रसन्ना भव विश्वमुत्रे ।।[13]

अस्मिन्नुदाहरणे र्त्त इति संयुक्ताक्षरस्य सकृत्साम्यम् । क-कारस्य बहुधा साम्यम् । च-वर्णस्य बहुधा साम्यम् । गन्धाढ्यधूपेन इत्यत्र ध-कारस्य सकृत्साम्यम् । एवं प्रकारेण श्रुत्यनुप्रासस्य उदाहरणमिदं भवितुमर्हति ।लिङ्गराजायनकाव्येऽपि अनुप्रासस्य चमत्कारः दृश्यते । यथा –

त्रिकालाक्षया यद्यपोहास्त ईद्धा
    परा ब्रह्मवत् शक्तिराराम्नाय सिद्धा ।
कदाचिद्ध्रसत्युन्नतिं याति भूयो
    विभोरिच्छया चक्रनेमिक्रमेण ।।[14]

अस्मिन् श्लोके ईद्धा, विद्धा इति अन्त्यवर्णसाम्यात् पादान्त्यानुप्रासः । अपि च परा, शक्तिराराम्नाय, विभोरिच्छा, इत्यादिषु शब्देषु र-कारस्य बहुधासाम्यात् श्रुत्यनुप्रासः । चक्रनेमिक्रमेण इत्यत्र क्र इति युक्ताक्षरस्य सकृत्साम्यमपि अनुप्रासप्रकाशकं भवति ।एवं प्रकारेण चतुर्षु अपि श्रीलिङ्गराजभक्तिसाहित्येषु अनुप्रासस्य स्वरझङ्कारः पदे पदे श्रूयते ।

(2) यमकम् – यमौ द्वौ समानजातिकौ तत्प्रतिकृतिः यमकम् । यद्वा यमयति श्रुतिमधुरतया सचेतसां हृदयमानन्दयति स्वरव्यञ्जनसंहतिक्रमनिवेश्यत्वेन नियमयतीति यमकम् । अर्थे सति भिन्नार्थयुक्तवर्णानां यत्र तेनैव क्रमेणावृत्तिर्जायते तत्र यमकालङ्कारः । उक्तं च विश्वनाथेन –

Journal
©

सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः ।
क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते ।।[15]

श्रीलिङ्गराजभक्तिकाव्येष्वस्योदाहरणं यथा –

लिङ्गानां वै ज्योतिषां द्वादशानां
राजत्येतत्संस्थितं लिङ्गराजम् ।
दिव्यैकाम्रे ब्रह्मलिङ्गं पुराणं
सितासितारुणनादस्वरूपम् ।।[16]

अस्मिन् श्लोके 'सितासितारुणनादस्वरूपम्" इति पदे 'सित" 'असितारुण" इति द्वयोः भिन्नार्थयोः पदयोः सन्धिद्वारा सिता–सिता इति क्रमेण तेनैवावृत्त्या यमकम् । यथा वा –

यदेकचूते विपिने सोम इदं
हवाहवाब्रह्मलिङ्गं पुराणम् ।
सितासितारुणनादस्वरूपं
तदालोक्यामृतमाप्नुहीति ।।[17]

इत्यस्मिन् उदाहरणे "हवाहवाब्रह्मलिङ्गम्", "सितासितारुण"इत्यत्र यमकम् ।

(3) उपमा – मम्मटेनोक्तं यत् – "साधर्म्यमुपमा भेदे"[18] इति । अर्थात् यत्र उपमानोपमेययोः स्वरूपतः सत्यपि भेदे उभयोः समानधर्मः वर्तते ताहृ तत्र उपमालङ्कारस्य प्रशक्तिः । अनन्वयालङ्कारात् भेदप्रतिपादनार्थम् उपमानोपमेययोः भेदः परिकल्पितोऽत्र ।

विश्वनाथेनास्य लक्षणमुक्तं यथा –"साम्यं वाच्यमवैधर्म्यं वाक्यैक्योपमाद्वयोः"[19] इति । अयं पूर्णालुप्ताभेदाभ्यां द्विविधा । यत्र स्थले उपमानोपमेयसाधारण– धर्मोपमाप्रतिपादकाः चत्वार उपमावाचकशब्दाः भवन्ति तत्र पूर्णा । यत्र एतेषु उपादानेषु एकस्य द्वयोस्त्रयाणां वा अनुपपत्तिः तत्र लुप्तोपमा । पूर्णोपमा श्रौतार्थीभेदेन द्विविधा । यथा–इवादिपदानां प्रयोगे श्रौतीपूर्णोपमा, तुल्यसदृशादिपदानां प्रयोगे आर्थीपूर्णोपमा भवति । पुनश्च एतद् द्वयं वाक्यगतत्वेन, समासगतत्वेन, तद्धितगतत्वेन च षड्विधं भवति । साहित्यदर्पणादिषु ग्रन्थेषु अस्योपमालङ्कारस्य बहवः भेदप्रभेदाः परिकल्पिताः । श्रीलिङ्गराजभक्तिसाहित्येऽस्योदाहरणानि यथा –

तस्य पत्नी खलीदेवी नाभीमोहनयोस्सुता ।
साध्वी सम्पूजिता लोके लक्ष्मीमूर्त्तिरिवतीव सा ।।
गर्भशुक्तिमणिस्तस्याः विप्रः वंशविभूषणः ।
ज्येष्ठश्चतुर्षु पुत्रेषु रामो दाशरथिष्विव ।।[20]

अत्र प्रथमश्लोके खलीदेवी लक्ष्मीमूर्त्तिरिव अतीव साध्वी लोके सम्पूजिता च आसीत् इति प्रतिपाद्यते । एवम् अत्र उपमेयभूता "खलीदेवी", उपमानम् "लक्ष्मीमूर्त्तिः", साधारणधर्मः "साध्वीत्वम्", "सम्पूजितत्वम्" च, "इव" इति उपमावाचकः शब्दः । एतेषां सर्वेषामपि उपादानात् उपमानोपमेयसाधर्म्यकथनाच्च पूर्णोपमालङ्कारः ।

Journal
©

तथैव द्वितीयश्लोके विप्रः दाशरथिषु रामः इव चतुर्षु पुत्रेषु ज्येष्ठः आसीदिति कथनेन राम–विप्रयोः साधर्म्यं प्रतिपाद्यते । अत्र "विप्रः"उपमेयः, "रामः"उपमानम्, "चतुर्षु पुत्रेषु ज्येष्ठत्वम्"साधारणधर्मः, "इव"इत्युपमावाचकः शब्दः । एतेषां सर्वेषामपि उपादानात् पूर्णोपमा । यथा वा –

इयन्मानभूमिमभिव्याप्य दीर्घा
तटीवाम्बुधि ग्रावमूर्त्तिस्समन्तात् ।
वृतिर्वर्त्तते वेधमानं तदीयं
फुटेत्याख्यया सार्धसप्तेति नव्याः ।।[21]

अस्मिन् उदाहरणे श्रीलिङ्गराजमन्दिरप्राङ्गणस्थलीम् अभिव्याप्य स्थिता ग्रावमुर्त्तिः पाषाणनिर्मिता उच्चतराकृतिः (प्राचीरम्) अम्बुधिं परितः अभिव्याप्य स्थिता तटीव वर्तते इति उपमा कविना प्रदीयते । अत्र उपमेयः "मन्दिरं परितः विद्यमानं प्राचीरम्", उपमानम् "समुद्रं परितः विद्यमानः तटप्रदेशः", साधारणधर्मः "परितः अभिव्यापनम्", साधारणधर्मः "इव"। इत्थं सर्वेषामपि उपादानात् पूर्णोपमाऽलङ्कारः । यथा वा –

चलन्तीशमूर्त्तिर्गता वह्निकोणं
स्वशक्त्या गणैरन्विताब्जास्यपादा ।
वहन्ती कलामैन्दिवीं मूर्ध्नि भक्त्या
इवाम्बोधिसेतुः सुवर्णप्रभाऽऽस्ते ।।[22]

अस्मिन् उदाहरणे ईशमूर्त्तेः वर्णना क्रियते । सा मूर्त्तिः 'अब्जास्यपादाऽस्ति" इति कथनेन अत्र मुर्त्तेः आस्यं पादौ च अब्जेन सह उपमीयते । अज्बे इव आस्यं पादौ च यस्याः सा इति विग्रहः । एवमत्र अब्जमुपमानम्, आस्यं तथा पादौ च उपमेयाः, इव इति उपमावाचकः शब्दः, सुन्दरत्वञ्च साधारणधर्मः । एतेषु चतुर्षु अपि उपादानेषु समस्तपदेऽस्मिन् केवलमुपमानोपमेययोः कथनात् वाचकधर्मलुप्तोपमायाः इदमुदाहरणं भवति । अपि च 'सुवर्णप्रभा मूर्त्तिः आस्ते" इति कथनेन 'सुवर्णस्य प्रभा अस्ति अस्याः" इति विग्रहेण मूर्त्तेः अतिशयोक्त्या कथनं भवति । अपि च 'अम्बोधिसेतुः इव मूर्त्तिः आस्ते" इति कथनेन अम्बोधिसेतुः उपमानम्, मूर्त्तिः उपमानम्, इव इत्युपमावाचकः शब्दः, संसारसागरसन्तरणसाधनम् इति साधारणधर्मः । एतेषु चतुर्षु अपि केवलम् उपमानोपमेयोपमावाचकशब्दानाम् उपादानात् धर्मलुप्तोपमायाः इदमुदाहरणं वक्तुं शक्यते । यथा वा –

सकृच्च जप्त्वेष्टमन्त्रजातं
दृष्ट्वा च शान्तं हनुमत्प्रवीरम् ।
दुग्धस्य कुण्डस्य पीयूषकल्पं
नीरं समास्वाद्य बभूव शान्तः ।।[23]

अस्मिन् उदाहरणे श्रीलिङ्गराजमन्दिरे विद्यमानस्य दुग्धकुण्डस्य नीरपानप्रसङ्गः उपस्थाप्यते । अत्र कुण्डस्य नीरं पीयूषकल्पं भवतीति कथनेन 'नीरम्" उपमेयः, 'पीयूषम्" उपमानम्, 'कल्पः" इति उपमावाचकश्शब्दः, शान्तिप्रदायकत्वं साधारणधर्मः । एतेषां चतुर्णामपि उपादानात् पूर्णोपमा नामालङ्कारः । यथा वा –

त्रिवेणीव सदानीरा शोभते मस्तके शुभे ।
कपर्दिनः जटाजूटे हिमवन्मस्तके यथा ।।[24]

यथा हिमालयस्य मस्तके सदानीरा त्रिवेणी शोभते तथैव कपर्दिनः शिवस्य जटायां एषा गङ्गा शोभते इति कथनेन गङ्गायाः हिमलय-शिवमस्तकशोभित्वमुपमीयते । अत्र शिवस्तस्य जटाजूटं च उपमेयः, हिमालयः तस्य मस्तकञ्च उपमानम्, सदानीरायाः गङ्गायाः प्रवाहः साधारणधर्मः, यथा, तथा इति उपमावाचकः शब्दौ । एवमत्र सर्वेषामपि उपादानात् पूर्णोपमा नामालङ्कारः । यथा वा –

आमूलं स्फटिकाबद्धं मध्ये वैडुर्यसन्निभम् ।
पद्मरागसमोर्ध्वं च ज्वलत्तत्तेजसातुलम् ।।[25]

अस्मिन् उदाहरणे श्रीलिङ्गराजस्य मूलभागे तेजः स्फटिकमणिसदृशम्, मध्यभागस्य तेजः वैडुर्यसन्निभम्, ऊर्ध्वतेजश्च पद्मरागमसः इति प्रतिपाद्यते । अनेन अत्र श्रीलिङ्गराजस्य मूल-मध्य-ऊर्ध्वतेजासिं उपमेयभूतानि सन्ति, क्रमशः स्फटिकमणिः, वैडुर्यमणिः, पद्मरागमणिश्च उपमानानि भवन्ति ; आबद्धम्, सन्निभम्, समानम् इति उपमावाचकाः उच्यन्ते ; तत्तन्मणीनां वर्णः तथा श्रीलिङ्गराजस्य तत्तद्भावस्य समानः वर्णः साधारणधर्मत्वेनोच्यते । एतेषां सर्वेषामपि उपादानात् पूर्णोपमाऽलङ्कारोऽत्र स्वीक्रियते । यथा वा –

क्षेत्रमेतत्समादिष्टं चक्राकारं शुभं मुने ।
सर्वपापघ्नमतुलं नानातीर्थविभूषितम् ।।[26]

श्रीलिङ्गराजक्षेत्रं चक्राकारं भवतीति उपमीयते । चक्रस्य आकारः इव वृत्ताकारं भवति एकाम्रक्षेत्रम् इति विग्रहः । अत्र एकाम्रक्षेत्रमुपमेयः, चक्रमुपमानम्, वृत्ताकारत्वं साधारणधर्मः, इव इति उपमावाचकः । एतेषु त्रिष्वपि उपमानोपमेयसाधारणधर्मस्थितौ वाचकलुप्तोपमा नामालङ्कारः।

यथा वा –"कञ्जाक्षं पीतवसनं नीरदाभं हरिं भजे ।"[27] इत्यस्मिन्नुदारणे "कञ्जं नाम पद्ममिव अक्षिणौ यस्य सः कञ्जाक्षः"इति विग्रहे श्रीविष्णोः नेत्रे पद्मतुल्ये इति उपमीयते । तथैव "नीरदाभम्"इत्यस्य "नीरद इव आभा कान्तिः अस्य अस्तीति नीरदाभः, तम्"इति विग्रहः । नीरदो नाम मेघः । श्रीकृष्णः मेघसदृशः इति उपमा अत्र प्रदीयते। उदाहरणमिदं लुप्तोपमायाः भवति । तत्र कञ्जाक्षमित्यत्र धर्मवाचकौ लुप्तौ । नीरदाभम् इत्यत्र उपमेय-वाचकौ लुप्तौ ।

एवं प्रकारेण श्रीलिङ्गराजभक्तिसाहित्ये नैकानि उदाहरणानि पूर्ण-लुप्तोपमयोः प्राप्यन्ते । अत्र सामान्यरूपेण बहुषु स्थलेषु देवदेवीनां नेत्र-पाद-वदनकान्तिवर्णना, तथा विविधपवित्रमन्दिर-पूजासाधना, मन्दिरस्य कारुकला, पूजापर्वणाम्, यात्राणां, विग्रहाणां च आलङ्कारिकसज्जीकरणं तथाभूतैः तत्सदृशैः पवित्र-सुन्दर-मनोहरद्रव्यैः क्रियते । एतत्सर्वमपि वर्णनं भक्तानां पाठकानां मनसि भगवद्भक्तिविभावानुभावरूपेण रसास्वादे सहायकमस्तीति निश्चप्रचं वक्तुं शक्यते ।

(4) रूपकम् – 'तद्रूपकमभेदो य उपमानोपमेययोः"[28] इति काव्यप्रकाशे वर्तते । साहित्यदर्पणे लिखितमस्ति – 'रूपकं रूपितारोपाद् विषये निरपह्नवे"[29] इति । अत्र ज्ञायते यत् यत्रोपमानोपमेययोः अभेदबुद्धिर्जायते, तत्र रूपकालङ्कारो भवति । अपह्नुत्यलङ्कारे उपमेयगोपनेन भेदस्य गोपनं भवति । अत्र तु भेदस्य गोपनं नास्ति । अत एव निरपह्नवे इति लक्षणे उक्तम् । अयं रूपकालङ्कारः त्रिविधः । यथा – (1) साङ्गरूपकम्, (2) निरङ्गरूपकम्, (3)परम्परितरूपकञ्चेति । श्रीलिङ्गराजभक्तिसाहित्ये रूपकस्योदाहरणं यथा –

ललाटेन्दुभूपस्य कीर्त्तिः पताका
समु◌ीयते मन्दिरे शुभ्ररूपा ।

सभूपस्तदन्ते पुरीं वासयित्वा
विभोः पूजनादिक्रमं चापि चक्रे ।।[30]

अस्मिन्नुदाहरणे ललाटेन्दुभूपस्य कीर्त्तेः उपरि पताकायाः आरोपणाद्रूपकम् । यथा वा –

हे देवौ ! चरणाम्बुजे च भवतोर्मञ्जीररागान्विते
सश्रीके करवीरनीलकमलैः चाम्पेयनागेश्वरैः ।
श्रीमत्केतककाञ्चनाणुरुषिते मन्दारविल्वैर्युते
विश्वस्यार्त्तिनिवारणाय तनुतां सर्वार्थसिद्धिप्रदे ।।[31]

अस्मिन्नुदाहरणे 'चरणाम्बुजे" इत्यत्र चरणयोः अम्बुजत्वारोपणात् रूपकम् । यथा वा –

दिव्यस्नेहसुधाप्रवाहसलिले मग्नाः कृतार्था ननु
विद्यार्थिप्रवरा वसन्ति मठके सारस्वतं चामृतम् ।
येषां मन्त्रपवित्रिताच्च वदनादास्वाद्य पूतात्मनां
श्रीवानाम्बरदाशशर्मविदुषां पादौ शरण्यौ मम ।।[32]

इत्यस्मिन्नुदाहरणे 'दिव्यस्नेहसुधाप्रवाहसलिले" इत्यत्र स्नेहस्योपरि सुधायाः आरोपणात् रूपकालङ्कारः । अपि च भक्तानां कृतार्थतायाः कृते भगवतः दिव्यस्नेहसुधाप्रवाहसलिले मग्नत्वं हेतुः इति काव्यलिङ्गालङ्कारोऽपि अत्र भवितुमर्हति । अनयोः संसृष्टिः स्वीक्रियते । यथा वा –

विघ्नेश्वरं नमस्कृत्य तत्र त्रिभुवनेश्वरम् ।
अष्टादशपुराणाब्धेर्वक्ष्याम्येकाम्रचन्द्रिकाम् ।।
असौ महोदयश्चन्द्रः स्वर्णाद्रावुदितो द्विजाः ।
प्रकाशयति लोकानामेकाम्रकवनोत्तमम् ।।[33]

इत्यनयोः श्लोकयोः प्रथमे 'अष्टादशपुराणाब्धेः" इत्यत्र पुराणस्योपरि अब्धेः आरोपणाद्रूपकं नामालङ्कारः । तथैव श्रीलिङ्गराजः स्वर्णाद्रौ उदितः चन्द्रः इति कथनेन श्रीलिङ्गराजस्योपरि चन्द्रस्यारोपणं क्रियते, तस्माद्रूपकम् । एवमत्र 'विघ्नेश्वरम्", 'त्रिभुवनेश्वरम्" इति शब्दयोः अन्त्यानुप्रासकिङ्किणीस्वनः श्रूयते । अपि च 'असौ महोदयः चन्द्रः स्वर्णाद्रौ उदितः एकाम्रकवनोत्तमं प्रकाशयति" इति वाक्यांशे श्रीलिङ्गराजः उपमेयः चन्द्ररूपेण परिणतः एकाम्रकाननम् प्रकाशयति इति निर्णयात् परिणामालङ्कारोऽपि अङ्गीकर्त्तुं शक्यते । विदुषामेव तत्र विचारः । यथा वा –

इतःपरं द्विजश्रेष्ठास्तत्र गन्तुं समुद्यताः ।
भवध्वं भवपाशाच्च विमुक्त्यै भवसागरात् ।।[34]

इत्यस्मिन् उदाहरणे 'भवपाशात्" इत्यत्र संसारस्योपरि पाशस्यारोपणात्,अपि च 'भवसागरात्" इत्यत्र भवस्योपरि सागरस्यारोपणाद्रूपकम् । यथा वा –

सर्वतीर्थमयं ह्येतदेकाम्रवनसंज्ञकम् ।
यत्साक्षात्परंब्रह्म लिङ्गरूपी वसत्यथ ।।
मर्त्यलोकेषु कैलासं विद्ध्येकाम्रवनं शुभम् ।
अनन्तवासुदेवं च पुनः प्राह स्वयं विभुः ।।[35]

Journal
©

इत्यस्मिन्नुदाहरणद्वये प्रथमे श्रीलिङ्गराजस्योपरि परब्रह्मणः, द्वितीये च एकाम्रवनस्योपरि कैलासस्य आरोपणं क्रियते, तस्माद्रूपकं नामालङ्कारः । यथा वा –

धिगस्तु वां पापनिगूढमानसौ
परस्त्रिया भोगविधानलालसौ ।
नैवंविधाहं युवयोर्विभाविनी
गमिष्यथो मृत्युनिकेतनं ध्रुवम् ।।[36]

अस्मिन्नुदाहरणे 'मृत्युनिकेतनम्" इत्यत्र मृत्योरुपरि निकेतनस्यारोपणाद्रूपकम् ।

(5) दीपकम् –

सकृद् वृत्तिस्तु धर्मस्य प्रकृताप्रकृतात्मनाम् ।
सैव क्रियासु वह्वीषु कारकस्येति दीपकम् ।।[37]

यत्र प्राकरणिकाप्राकरणिकानां (उपमेयोपमानानां) साधारणधर्मः सकृद् व्यवह्रियते अपि च यत्रैकस्य कारकस्य कर्त्तृकर्मत्वादिकारकमध्येषु कस्यचिदेकस्य बह्वीषु क्रियासु व्यवहारो भवति तत्र दीपकमित्यलङ्कारः स्वीक्रियते । श्रीलिङ्गराजस्य भक्तिसाहित्ये दीपकस्योदाहरणं यथा ग्रामप्रान्ते मठे देवं राधामदनमोहनम् ।

महेशं विश्वनाथञ्च ननाम सुसमाहितः ।।[38]

इत्यस्मिन् उदाहरणे कर्मकारकपदैः 'राधामदनमोहनम्", 'महेशम्", 'विश्वनाथम्" इत्येतैः 'ननाम" इति क्रियापदस्याभिसम्बन्धात् दीपकं नामालङ्कारः । यथा वा –

ब्रह्मादींश्च ऋषींश्चैव सनकादींस्तथैव च ।
यमादितर्पणं कृत्वा शुचिर्भूत्वा यथाविधि ।।
पितॄन् पितामहांश्चैव तथैव प्रपितामहान् ।
मातृमातामहींश्चैव पितृव्यादींस्तथैव च ।।[39]

इत्यस्मिन् उदाहरणे ब्रह्मादीन्, ऋषीन्, सनकादीन्, पितॄन्, पितामहान्, प्रपितामहान्, मातृ–मातामहीन्, पितृव्यादीन् इत्यादिभिः कर्मकारकपदैः सह तर्पणसमर्पणरूपक्रियायाः सम्बन्धात् दीपकमिति अलङ्कारः । यथा वा –

धूपैर्दीपैश्च नैवेद्यैरुपहारैस्तथा स्तवैः ।
दण्डवत्प्रणिपातैश्च गीतैर्वाद्यैर्मनोहरैः ।।
नृत्यजाप्यनमस्कारैर्जयशब्दैः प्रदक्षिणैः ।
एवं सम्पूज्य विधिवद्देवदेवं जर्गुरुम् ।।[40]

इत्यस्मिन्नुदाहरण धूपैः, दीपैः, नैवेद्यैः, उपहारैः, स्तवैः, दण्डवत्प्रणिपातैः, गीतैः, वाद्यैः, नृत्यजाप्यनमस्कारैः, जयशब्दैः, प्रदक्षिणैः इत्येतैः करणकारकपदैः सम्पूजनरूपक्रियायाः सम्बन्धाद् दीपकालङ्कारः स्वीक्रियते ।

(6) काव्यलिङ्गम् – कुवलयानन्दे उच्यते – "समर्थनीयस्यार्थस्य काव्यलिङ्गं समर्थनम्"[41] इति । अर्थात् यत्र कस्यापि समर्थनीयस्य अर्थस्य केनापि पदार्थेण वाक्येन वा समर्थनं क्रियते, तत्र काव्यालिङ्गं नामालङ्कारो भवति । साहित्यदर्पणेऽपि उच्यते –"हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते"[42] इति । अर्थात् अर्थविशेषं प्रति वाक्यार्थः पदार्थो वा यदि हेतुर्भवति तदाऽयमलङ्कारः इति निष्कर्षः । श्रीलिङ्गराजस्य भक्तिसाहित्येऽस्योदाहरणं यथा –

Journal
©

केदारगौरीं निकषा वहन्तीं
कुल्यां समुत्तीर्य च पूतनीराम् ।
मातुश्च गौर्याश्चरणामृतेन
स्नेहार्द्रदृष्ट्या च परिप्लुताङ्गीम् ।।[43]

इत्यस्मिन् उदाहरणे मातुः गौर्याः चरणामृतेन तथा च स्नेहाद्रदृष्ट्या परिप्लुताङ्गीम् इति कथनेन परिप्लुताङ्गत्वरूपार्थस्य हेतुत्वेन गौर्याः चरणामृतं तथा स्नेहार्द्रदृष्टिः प्रतिपाद्यते । अतः काव्यलिङ्गं नामालङ्कारः । यथा वा –

यत्र साक्षाज्जगन्नाथो यत्र बिन्दुसरोवरः ।
यत्र विश्वेश्वरो देवस्तत्र मुक्तिर्न संशयः ।।[44]

इत्यस्मिन् उदाहरणे मुक्तेः हेतुत्वेन साक्षाज्जगन्नाथस्य, बिन्दिसरोवरस्य, विश्वेश्वरस्य च क्षेत्रे स्थितिः हेतुत्वेन प्रतिपाद्यते । अतः काव्यलिङ्गं नामालङ्कारः । यथा वा –

श्रीवासुदेवस्य च दर्शनेन
दक्षस्य शेषस्य गदायुधस्य ।
शठाः खला नास्तिककर्मयुक्ता
एकाम्रके मुक्तिमवाप्नुयुस्ते ।।[45]

इत्यस्मिन्नुदाहरणे श्रीवासुदेवस्य, दक्षस्य, शेषस्य, गदायुधस्य च दर्शनं शठानां खलानां नास्तिककर्मयुक्तानां मुक्तिकारणत्वेन प्रतिपादनात् काव्यलिङ्गम् ।

(7) सन्देहः – काव्यप्रकाशे उच्यते – “ससन्देहस्तु भेदोक्तौ तदनुक्तौ च संशयः”[46] । अर्थात् यत्र संशयः प्रकृतस्य उपमेयस्य समेन उपमानेन सादृश्यज्ञानप्रयोज्यो भवति तत्र सन्देहो नामालङ्कारः स्वीक्रियते । श्रीलिङ्गराजभक्तिसाहित्येऽस्योदाहरणं यथा –

गान्धर्वी मनुजाधिपस्य तनया किं वा समुद्रात्मजा
किंवा कामविमोहिनी रतिरसि प्रोद्भिन्नतुङ्गस्तना ।
नोचेच्छक्रमनोहरा त्वमसि का प्रीत्या वदात्राशनै–
स्त्वन्नौ मोहयसीन्दुमण्डलमुखी प्रागेव सन्तापदे ! ।।[47]

इत्यस्मिन्नुदाहरणे कीर्त्तिवासौ दानवौ पार्वत्याः रूपलावण्यं दृष्ट्वा संशयं कुर्वन्ति तत्सदृशानां रमणीनां पार्वतीरूपसाम्यं दृष्ट्वा । यथा – किं सा गान्धर्वी ? किं सा समुद्रात्मजा ? किं वा सा कामविमोहिनी रतिः ? किं वा शक्रस्य मनोहरा पत्नी ? इत्यादि । अतोऽत्र सन्देहो नामालङ्कारः । अपि च 'इन्दुमण्डलमुखी“ इत्यत्र इन्दुमण्डलमिव मुखं यस्याः सा इति विग्रहात् इन्दुमण्डलेन साकं मुखमण्डलस्य साम्यकथनादुपमाऽलङ्कारोऽपि सम्भवति । इयञ्चोपमा साधारणधर्म–वाचकलुप्ता इति ज्ञेया । अत्र उपमा–सन्देहयोः सङ्करः स्वीकर्तव्यः ।

(8) विरोधालङ्कारः – विरोधालङ्कारं लक्षयन्नाचार्यो दण्डी काव्यादर्शे लिखति –

विरुद्धानां पदार्थानां यत्र संसर्गदर्शनम् ।
विशेषदर्शनायैव सः विरोधः स्मृतो यथा ।।[48]

Journal
©

भामहेनोच्यते –

गुणस्य वा क्रियाया वा विरुद्धान्यक्रियाभिधा ।
या विशेषाभिधानाय विरोधं तं विदुर्बुधाः ।।[49]

साहित्यदर्पणे उच्यते –

जातिश्चतुर्भिर्जात्याद्यैर्गुणो गुणादिभिस्त्रिभिः ।
क्रिया क्रियाद्रव्याभ्यां यद् द्रव्यं द्रव्येण वा मिथः ।
विरुद्धमिव भासेत विरोधोऽसौ दशाकृतिः ।।[50]

अर्थात् यत्र जाति–द्रव्य–गुण–क्रियादिविषये मिथः विरोधः दृश्यते, तत्र विरोधालङ्कारो भवति । तत्रादौ जाति–द्रव्य–गुण–क्रियाभिस्सह अन्योन्यं जातिः वरुिद्धा भवति तत्र चत्वारः विरोधाः । यत्र गुण–क्रिया–द्रव्यैः सह मिथः र्युणो विरुद्ध इव भासेत, तत्र त्रयः विरोधाः । यत्र क्रियाद्रव्याभ्यां सह मिथः यत् क्रिया विरुद्धेव भासेत तत्र द्वौ विरोधौ । तथा द्रव्येण सह मिथः यद् द्रव्यं विरुद्धमिव भासेत तत्र एकः विरोधः । एवं विरोधः दशविधो भवति । श्रीलिङ्गराजभक्तिसाहित्येऽस्योदाहरणं यथा –

विशालो वृषस्सोमसूत्रेण हीनः
शयानोऽपि विद्योतमानास्यकर्णः ।
समुत्थाप्य मानाकृतिस्सावधान–
स्तमीशानमासेवते तद्दिशायाम् ।।[51]

इत्यस्मिन्नुदाहरणे श्रीलिङ्गराजमन्दिरे विद्यमानस्य वृषभस्य वर्णना क्रियते । वृषभोऽयं श्रीलिङ्गराजस्य पुरत एव विराजते । अत्र कविः 'शयानोऽपि विद्योतमानास्यकर्णः" इति प्रतिपादयति । अत्र शयानोऽपि अस्य आस्यं कर्णौ च विद्योतन्ते इति विरुद्धधर्मकथनात् विरोधो नामालङ्कारः शयनरतानां पशूनां कर्णः न विद्योतते इति यावत्। तथैव

तदन्ते गजन्यस्तपादाब्जपद्मा–
श्चितक्रोडनारायणयस्यास्ति मूर्त्तिः ।
परा यत्र कारोः कृतिः पूर्त्तिमाप्ता
दिताङ्गाऽपि नीचेन विद्योतते सा ।।[52]

श्रीलिङ्गराजमन्दिरे वृषभस्य समीपे विद्योतमानायाः पद्मायाः वर्णना अत्र क्रियते । अस्याः विग्रहः यवनैः दिताङ्गः (खण्डिताङ्गः) अपि नीचने विद्योतते इति कथ्यते । सामान्यतया खण्डिताङ्गानां विद्योतनं न भवति । किन्तु अत्र खण्डिताङ्गाऽपि पद्मामूर्त्तिः विद्योतते इति विरुद्धधर्मकथनात् विरोधालङ्कारोऽङ्गीकर्तव्यः । अपि च 'गजन्यस्तपादाब्जपद्मा" इत्यत्र पादस्योपरि पद्मस्यारोपणात् रूपकं नामालङ्कारोऽपि भवति । यथा वा –

एकाम्रके बिन्दुसरोवरान्ते
परात्परं ब्रह्म सदात्मकोऽसि ।
अनीश्वरश्शाश्वत ईश्वरस्तु
श्यामोपलाङ्गो हरिरर्कतेजाः ।।[53]

इत्यस्मिन्नुदाहरणे 'अनीश्वरः शाश्वतः ईश्वरः भवति", 'श्यामलोपलाङ्गः हरिः अर्कतेजाः भवति" इति विरुद्धधर्मकथनाद् विरोधो नामालङ्कारो भवति ।

(9) अपह्नुतिः – यत्र प्रकृतमुपमेयं वस्तु तिरस्कृत्य उपमानस्य स्थापना क्रियते तत्रापह्नुतिर्नामालङ्कारो भवति । यथोच्यते साहित्यदर्पणे – "प्रकृतं प्रतिषिध्यान्यस्थापनं स्यादपह्नुतिः"[54] इति । श्रीलिङ्गराज- भक्तिसाहित्येऽस्योदाहरणं यथा –

लिङ्ग्यते ज्ञायते यस्मात्तस्माल्लिङ्गस्वरूपभाक् ।
पूर्णब्रह्मस्वरूपोऽयं न लिङ्गः भुवनेश्वरः ।।[55]

इत्यस्मिन्नुदाहरणे श्रीलिङ्गराजमन्दिरे शोभमानः भुवनेश्वरः लिङ्गः न लिङ्गः अपि तु पूर्णब्रह्मस्वरूपः इति प्रकृतं लिङ्गं प्रतिषिध्य तत्स्थाने पूर्णब्रह्मणः प्रतिपादनात् अपह्नुतिर्नामालङ्कारः स्वीक्रियते । यथा वा –

नाहं समुद्रस्य सुता न चान्या
नाहं रतिर्नैव पुलोमजाऽहम् ।
गन्धर्वपत्नी न च राजनन्दिनी
गोपालनार्थं किल गोप्यहं विभो ! ।।[56]

इत्यस्मिन्नुदाहरणे पार्वती आत्मानं प्रस्तौति उपमानानां प्रतिषेधं कृत्वा । यथा – सा समुद्रस्य सुता लक्ष्मीः न भवति, सा रतिर्नैव भवति, सा पुलोमजा नास्त, सा गन्धर्वपत्नी अपि नास्ति, न च काऽपि राजनन्दिनी, अपि तु गोपालनार्थं स्वीकृतवेषा गोपी इति । एवमन्त्र पार्वत्याः कृते प्रदत्तानि सर्वाण्यपि उपमानानि निषिध्य तत्र उपमेयस्य स्पष्टीकरणात् अपह्नुतिर्नामालङ्कारः ज्ञेयः ।

कदाचित् अस्य श्लोकस्य पूर्वमेव पार्वत्याः रूपलावण्येन विमुग्धौ कीर्त्तिवासौ नामकौ दानवौ सा का ? इति सन्देहपूर्वकप्रश्नान् पृष्टवन्तौ । अतः तत्र सन्देहालङ्कारः स्वीकृतः । तस्यैव श्लोकस्य अनुवर्तनतया पार्वत्याः उक्त्या सन्देहस्य निराकरणमत्र अपह्नुत्या क्रियते । अतः उभयोः श्लोकयोः युग्मतया ग्रहणेन निश्चयान्तसन्देहोऽपि अत्र कल्पयितुं शक्यते ।

(10) उल्लेखः – कुवलयानन्दे उच्यते "बहुभिर्बहुधोल्लेखादेकस्योल्लेख इष्यते"[57]। यत्र नानाविधधर्मयोग्येकं वस्तु तत्तद्धर्मयोगरूपनिमित्तभेदेनानेकैः ग्रहीतृभिः अनेकधा उल्लिख्यते तत्रोल्लेखालङ्कारो भवति । साहित्यदर्पणेऽप्युच्यते –

क्वचिद्भेदाद् ग्रहीतृणां विषयाणां तथा क्वचित् ।
एकस्यानेकधोल्लेखो यः स उल्लेख उच्यते ।।[58]

अनेनोल्लेखस्य द्विधा भेदः स्वीक्रियते । यथा – (1) ग्रहीतृभेदाद् बहुधोल्लेखः (2) विषयभेदाद् बहुधोल्लेखः इति । श्रीलिङ्गराजभक्तिसाहित्येऽस्योदाहरणं यथा –

कीर्त्तिर्यस्य सुरासुरैर्मुनिवरैरागीयते नित्यशो
नाकक्ष्मातलवासिभिः सुरनरैर्विद्याधरैः किन्नरैः ।
पातालेषु च कन्दरेष्वपि महीध्रणां गतैः पन्नगै-
र्ब्रह्मोपेन्द्रसहान्वितैस्त्रिजगतः कत्रे नमः शम्भवे ।।[59]

Journal
©

इत्यस्मिन्नुदाहरणे श्रीशम्भोः कीर्त्तिः बहुभिः सुरासुरैः, मुनिवरैः, नाकक्ष्मातलवासिभिः, सुरनरैः, विद्याधरैः इत्यादिभिः गीयते इति एकस्याः कीर्त्तेः बहुभिः उल्लेखाद् उल्लेखो नामालङ्कारः स्वीक्रियते । अत्रानुप्रासस्यापि झङ्कारः श्रूयते । यथा च –

ब्रह्मस्थानं परं विद्धि मर्त्यलोके ह्यनुत्तमम् ।
भौमस्वर्गमिदं सम्यक् प्रवदन्ति मनीषिणः ।।[60]

इत्यस्मिन्नुदाहरणे एकाम्रकाननं मर्त्यलोके ब्रह्मस्थानं तथा भौमस्वर्गम् अस्तीति एकस्य एकाम्रक्षेत्रस्य ब्रह्मस्थानत्वेन भौमस्वर्गत्वेन च उल्लेखादुल्लेखो नामालङ्कारः ।

(11) अतिशयोक्तिः – निगीर्याध्यवसानं तु प्रकृतस्य परेण यत् ।
प्रस्तुतस्य यदन्यत्वं यद्यर्थोक्तौ च कल्पनम् ।।
कार्य्यकारणयोर्यश्च पौर्वापर्य्यविपर्य्ययः ।
विज्ञेयातिशयोक्तिः सा ........ ।।[61]

इयमतिशयोक्तिः चतुर्धा भवति । यत्र उपमानेन (परेण) निगीर्यमाणस्य उपमेयस्य प्रतिपादनं तत्र प्रथमप्रकारा । यत्र प्रकृतवस्तुनः प्रकारान्तरेणाभिधानं तत्र द्वितीयप्रकारा । यत्र 'यदि" इति शब्देन असम्भविनः अर्थस्य कल्पनं भवति तत्र तृतीयप्रकारा । यत्र कारणकार्ययोर्वैपरीत्यं भवति, अर्थात् आदौ कारणमनुक्त्वा कार्य्यकथनानन्तरं कारणम् उच्यते तत्र चतुर्थप्रकारा भवति ।

अग्निपुराणे उच्यते –

लोकसीमातिवृत्तस्य वस्तुधर्मस्य कीर्तनम् ।
भवेदतिशयो नाम सम्भवासम्भवाद् द्विधा ।।[62]

श्रीलिङ्गराजभक्तिसाहित्येऽस्योदाहरणं यथा –

गरुत्मद्वृषाधिष्ठितः स्थूलकायोऽ–
म्बरस्पृक् तदग्रेऽरुणस्तम्भसाक्षी ।
स्वतोऽभेदसत्त्वेऽपि विष्णोश्शिवस्य
हरेरद्वयं लिङ्गराजस्य वक्ति ।।[63]

अस्मिन् उदाहरणे अम्बरस्पृक् अरुणस्तम्भसाक्षी इति वाक्यांशे अरुणस्तम्भस्य अम्बरस्पर्शता लोकसीमातिगोचराऽस्ति । अतः अग्निपुराणवचनानुसारेण अतिशयोक्तेरुदाहरणमिदमिति वक्तुं युज्यते ।

(12) कारकदीपकम् – कुवलयानन्दे उच्यते –

क्रमिकैकगतानां तु गुम्फः कारकदीपकम् ।[64]

अर्थात् यत्र कारकगतानेकक्रियाः युगपद्वर्ण्यन्ते तत्र कारकदीपकालङ्कारः स्वीक्रियते । श्रीलिङ्गराजभक्तिसाहित्ये क्षेत्रद्वये विप्रविलसितमिति काव्ये अस्योदाहरणं यथा –

महामृत्युञ्जयं मन्त्रमुच्चार्य प्रयतः कृती ।
अर्पयन् विल्वपत्राणि चन्दनं कुसुमानि च ।।
अभिषिच्य सरस्तोयं धूपदीपेन सुस्तुतम् ।

Journal
©

नारीकेलजलेनापि स्नापयित्वा यथोचितम् ।।
परशमणिरूपेण प्रख्यातं च कपर्दिनम् ।
साष्टाङ्गं प्रणिपत्यापि स्वजन्मसफलीकृतम् ।।[65]

(13) परिकर: – 'विशेषणैर्यत्साकूतैरुक्ति: परिकरस्तु स:"84 इति काव्यप्रकाशे । अर्थात् यत्र अभिप्रायमूलकैर्विशेषणै: काचिदुक्ति: पुष्टा भवति, तत्र परिकरालङ्कार: स्वीक्रियते ।

वन्दे देवमुपापतिं सुरगुरुं वन्दे जगत्कारणं
वन्दे पन्नगभूषणं स्मरहरं वन्दे पशूनां पतिम् ।
वन्दे सूर्यशशाङ्कवह्निनयनं वन्दे मुकुन्दप्रियं
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शङ्करम् ।।[66]

अस्मिन्नुदाहरणे शङ्कर: सदा शं शुभमेव करोति इति कारणात् सार्थकं नाम भवति । अस्य जगत्कारण:, स्मरहर:, पशुपति:, भक्तजनाश्रय: इति विशेषणानि सार्थकतयाऽत्र प्रतिपादितानि , अत: परिकरो[67] नामालङ्कार: अत्र स्वीक्रियते ।

इत्येवमन्येऽप्यलङ्कारा: तत्र तत्र काव्यशोभां वर्धयन्ति । दिङ्मात्रमत्र प्रदत्तम् ।

– टिप्पणी –

1) साहित्पदर्पण: – 10/1
2) काव्यप्रकाश: – 9/सू–104
3) तत्रैव – सू.106
4) काव्यप्रकाश: – 9/सू.107
5) साहित्यदर्पण: – 10/6
6) साहित्यदर्पण: – 10/5
7) साहित्यदर्पण: – सू.112/का.81
8) तत्रैव – 1/4
9) स्वर्णाद्रिमहोदय: – 11/29
10) तत्रैव– 11/38
11) एकाम्रचन्द्रिका – 3/17
12) क्षेत्र.द्व.वि.वि. – 2/69
13) एकाम्रचन्द्रिका – 3/68
14) लि.रा.वि.का. – श्लो.3
15) साहित्यदर्पण: – 10/8
16) एकाम्रचन्द्रिका – 2/6
17) स्वर्णाद्रिमहोदय: – 5/12
18) काव्यप्रकाश: – 10/सू.1.
19) साहित्यदर्पण:–10/का.14
20) क्षेत्रद्वयेविप्रविलसितम् – 1/6–7
21) लिङ्गराजायनम्, विज्ञानकाण्डम् – श्लो.27
22) तत्रैव – श्लो.30
23) क्षेत्रद्वयेविप्रविलसितम् – 2/7
24) तत्रैव – 3/33
25) एकाम्रचन्द्रिका – 2/11
26) स्वर्णाद्रिमहोदय: – 1/35
27) तत्रैव – 4/11
28) काव्यप्रकाश: – 10/सू. 15
29) साहित्यदर्पण: – 10/का.28
30) लिङ्गराजायनम्, विज्ञानकाण्डम् – श्लो.16
31) क्षेत्रद्वयेविप्रविलसितम् – 3/23
32) क्षेत्रद्वयेविप्रविलसितम् – 4/2
33) एकाम्रचन्द्रिका – 1/5–6
34) तत्रैव – 2/30

Journal
©

35) स्वर्णाद्रिमहोदयः - 1/61-62
36) तत्रैव - 11/25
37) काव्यप्रकाशः - 10/सू.156
38) क्षेत्रद्वयेविप्रविलसितम् - 1/29
39) स्वर्णाद्रिमहोदयः - 3/32-33
40) तत्रैव - 5/44-45
41) कुवलयानन्दम् - 121
42) साहित्यदर्पणः - 10/62
43) क्षेत्रद्वयेविप्रविलसितम् - 2/5
44) एकाम्रचन्द्रिका - 2/65
45) तत्रैव - 3/8
46) काव्यप्रकाशः - 10/92
47) स्वर्णाद्रिमहोदयः 11/20
48) काव्यादर्शः - 2/333
49) भामहकाव्यालङ्कारः - 3/25
50) साहित्यदर्पणः - 10/67-68
51) श्रीलिङ्गराजायनम्, विज्ञालकाण्डम् - श्लो.27
52) श्रीलिङ्गराजायनम्, विज्ञालकाण्डम् - श्लो.29
53) एकाम्रचन्द्रिका - 3/6
54) साहित्यदर्पणः - 10/38
55) एकाम्रचन्द्रिका - 2/20
56) स्वर्णाद्रिमहोदयः - 11/21
57) कुवलयानन्दम्- 7
58) साहित्यदर्पणः - 10/37
59) एकाम्रचन्द्रिका - 1/2
60) स्वर्णाद्रिमहोदयः - 1/30
61) काव्यप्रकाशः-सू.29/का.14-15
62) अ.पु. - 25-26/344
63) लिङ्गरा.वि.का. - श्लो.21
64) कुव. - 117
65) क्षेत्रद्वयेविप्रविलसितम् - 3/34-36
66) काव्यप्रकाशः - 10/सू. 59
67) स्वर्णाद्रिमहोदयः - 1/1

– सन्दर्भग्रन्थसूची –

1) एकाम्रचन्द्रिका (ओडिआगद्यानुवादसहिता), केदारनाथगवेषणाप्रतिष्ठानम्, केदारगौरीमार्गः, भुवनेश्वरम् -2, प्रथमसंस्करणम् - 1995 ।
2) कपिलसंहिता, द्वितीयभागः, सम्पादकः - पण्डितशशिधरमिश्रः, प्रकाशिका - श्रीमती कनकलतामहान्तिः, कावेरा,3ढेङ्कानालः, प्रथमसंस्करणम् - 1999 ।
3) क्षेत्रद्वये विप्रविलसितम्, आचार्यः विप्रचरणपाठी, प्रकाशिका - श्रीमतीपुष्पाञ्जलीपाठी, मेडिकाल व्याङ्क कलोनी, सैकेण्ड लैन, ब्रह्मपुरम् - 4, गञ्जाममण्डलम्, ओडिशा, संस्करणम्-2004 (अशोकाष्टमी) ।
4) स्वर्णाद्रिमहोदयः, सम्पा. डा.भगवान् पण्डा, केदारनाथगवेषणाप्रतिष्ठानम्, भुवनेश्वरम्, 2002 संस्करणम् ।
5) श्रीलिङ्गराजायनम् (विज्ञानकाण्डम्), रचयिता - गणेश्वरविद्यावाचस्पतिः, सम्पादकः अनुवादकश्च - डा.पण्डितभास्करमिश्रः, प्रकाशकः - पण्डितभास्करमिश्रः, पोडापल्ली, पो.मुण्डमरई, गञ्जाममण्डलम्, ओडिशा, संस्करणम् - 2008 ।
6) श्रीलिङ्गराजायनम् (ज्ञानविज्ञानकाण्डसमेतम्), रचयिता गणेश्वरविद्यावाचस्पतिः, सम्पादकः - लडुकेश्वरशतपथी, प्रकाशकः - ओडिशासाहित्यैकादमी, भुवनेश्वरम्, प्रथमसंस्करणम् - 1970 ।

Journal
©

7) काव्यप्रकाशः (मम्मटः) – सम्पादकः – डा.श्रीनिवासशास्त्री । रतिरामशास्त्री, साहित्यभण्डार, सुभाषवाजार, मेरठ । 1998 ।
8) काव्यालङ्कारः (भामहः) – सम्पा. डा.रामानन्दशर्मा । प्रकाशकः – चौखम्बा संस्कृत सीरीज् आफिस्, वाराणसी, 221001, 2002 ।
9) कुवलयानन्दः – अप्पय्यदीक्षितः । सम्पादकः – डा.भोलाशङ्करव्यासः । प्रकाशकः– चौखम्बा सुरभारती प्रकाशनम्, के. 37/117, गोपालमन्दिर लैन, पो.ब.न. – 129, वाराणसी । 1956 ।
10) साहित्यदर्पणः – श्रीविश्वनाथकविराजः । व्याख्याकारः – आचार्यः कृष्णमोहनशास्त्री। प्रकाशकः – चौखम्बा संस्कृत सीरीज् आफिस्, पो.व.नं. – 8, वाराणसी – 1 । 1967 ।